३

धेनवः वत्सेभ्यः क्षीरं वितरन्ति। व्याघ्रः आहाराय भ्राम्यति।

बालकाः अध्ययनाय पाठालयं गच्छन्ति।

बालिकाः पुष्पाय उद्यानं व्रजन्ति। वयं जलाय नदीं गच्छामः।

यूयम् अश्वेभ्यः तृणं यच्छथ। वयं ज्ञानाय पठामः।

धनाय जनाः देशान्तरं गच्छन्ति। बालाः विद्यायै धनं यच्छन्ति।

शाखायाः पर्णानि पतन्ति। मक्षिकाः पुष्पेभ्यः मधु पिबन्ति।

बीजात् अङ्कुरः प्ररोहति। पात्रात् जलं स्रवति।

धेनुः व्याघ्रात् त्रस्यति। अहं पीठात् उत्तिष्ठामि।

त्वं तरोः अवरोहसि। पर्वतात् नदी प्रवहति।

धनिकाः ग्रामात् नगरम् गच्छन्ति ।

समुद्रात् जनाः रत्नानि आनयन्ति ।